# Lingashtakam Lyrics in Hindi

**।। ॐ नमः शिवाय ।।**

ब्रह्ममुरारि सुरार्चित लिंगं निर्मलभासित शोभित लिंगम् ।

जन्मज दुःख विनाशक लिंगं तत्प्रणमामि सदाशिव लिंगम् ।।१।।

देवमुनि प्रवरार्चित लिंगं कामदहन करुणाकर लिंगम् ।

रावण दर्प विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगम् ।।२।।

सर्व सुगंध सुलेपित लिंगं बुद्धि विवर्धन कारण लिंगम् ।

सिद्ध सुरासुर वंदित लिंगे तत्प्रणमामि सदाशिव लिंगम् ।।३।।

कनक महामणि भूषित लिंगं फणिपति वेष्टित शोभित लिंगम् ।

दक्षसुयज्ञ विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगम् ।।४।।

कुंकुम चंदन लेपित लिंगं पंकज हार सुशोभित लिंगम् ।

संचित पाप विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगम् ।।५।।

देवगणार्चित सेवित लिंगं भावै-र्भक्तिभिरेव च लिंगम् ।

दिनकर कोटि प्रभाकर लिंगं तत्प्रणमामि सदाशिव लिंगम् ।।६।।

अष्टदळोपरिवेष्टित लिंगं सर्वसमुद्भव कारण लिंगम् ।

अष्टदरिद्र विनाशन लिंग तत्प्रणमामि सदाशिव लिंगम् ।।७।।

सुरगुरु सुरवर पूजित लिंग सुरवन पुष्प सदार्चित लिंगम् ।

परात्परं परमात्मक लिंगं तत्प्रणमामि सदाशिव लिंगम् ।।८।।

लिंगाष्टकमिदं पुण्यं यः पठेश्शिव सन्निधौ ।

शिवलोकमवाप्नोति शिवेन सह मोदते ।।

**।। इति श्री लिङ्गाष्टकं स्तोत्रम् सम्पूर्ण ।।**

## Lingashtakam Lyrics in English

Brahmamuraari Suraarchit Lingam Nirmalabhaasit Shobhit Lingam .

Janmaj Duahkh Vinaashak Lingam TatpraṆAmaami Sadaashiv Lingam ..१..

Devamuni Pravaraarchit Lingam Kaamadahan KaruṆAakar Lingam .

Raavaṇ Darp Vinaashan Lingam TatpraṆAmaami Sadaashiv Lingam ..२..

Sarv Sugandh Sulepit Lingam Buddhi Vivardhan Kaaraṇ Lingam .

Siddh Suraasur Vandit Linge TatpraṆAmaami Sadaashiva Lingam ..३..

Kanak MahaamaṆI Bhuushit Lingam PhaṆIpati VeshṬIt Shobhit Lingam .

Dakshasuyajñ Vinaashan Lingam TatpraṆAmaami Sadaashiv Lingam ..४..

Kunkum Chandan Lepit Lingam Pankaj Haar Sushobhit Lingam .

Sanchit Paap Vinaashan Lingam TatpraṆAmaami Sadaashiv Lingam ..५..

DevagaṆAarchit Sevit Lingam Bhaavai-Rbhaktibhirev Ch Lingam .

Dinakar KoṬI Prabhaakar Lingam TatpraṆAmaami Sadaashiv Lingam ..६..

AshṬAdaloparíveshṬIt Lingam Sarvasamudrav Kaaraṇ Lingam .

AshṬAdaridr Vinaashan Ling TatpraṆAmaami Sadaashiv Lingam ..७..

Suraguru Suravar Puujit Ling Suravan Pushp Sadaarchit Lingam .

Paraatparam Paramaatmak Lingam TatpraṆAmaami Sadaashiv Lingam ..८..

LingaashṬAkamidam PuṆYam Yah PaṬHeshshiv Sannidhow .

Shivalokamavaapnoti Shiven Sah Modate ..

**Lingashtakam PDF**